दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः
▪ पृष्ठ-3 ▪ वर्ष-3 ▪ अङ्क-187
1
28.04.2024 रविवासरः वि.सं. २०८० बैशाखकृष्णपञ्चमी बैशाख 16 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## देशस्य महिलाः युवानश्च भाजपा-सर्वकारस्य प्राथमिकता सर्वदा एव सन्ति- प्रधानमन्त्री



प्रधानमन्त्रिणा भाजपा-वरिष्ठनेत्रा च नरेन्द्रमोदिना उक्तं यत् विगतदशवर्षेषु एनडीए-सर्वकारेण देशस्य प्रमुखसमस्यानां स्थायिसमाधानं प्राप्तुं प्रयत्नः कृतः। महाराष्ट्रस्य कोल्हापुरस्य तपोवन-प्राङ्गणे जनसभां सम्बोधयन् मोदी अवदत् यत् देशस्य महिलाः युवानः च सर्वदा एव स्वसर्वकारस्य प्राथमिकता एव सन्ति। युवानां कृते रोजगारस्य अवसरं प्रदातुं मोदी एनडीए सर्वकारस्य आत्मनिर्भर- भारतस्य स्टार्टअप भारतस्य च उपक्रमस्य उल्लेखं कृतवान्। सः अवदत् यत् यदि तस्य सर्वकारः पुनः सत्तां प्राप्नोति तर्हि मुद्रायोजनायाः अन्तर्गतं ऋणराशिं द्विगुणं कृत्वा २० लक्षरूप्यकाणि भविष्यति। काङ्ग्रेस-भारतगठबन्धनयोः उपरि आक्रमणं कुर्वन् प्रधानमन्त्री मोदी उक्तवान् यत् एतेषां जनानां राष्ट्रविरोधि-द्वेषपूर्णराजनीतेः स्वलक्ष्यद्वयं कृतम्। सः अवदत् यत् इदानीं निश्चितं यत् वंचितवर्गेभ्यः, अनुसूचितजातिभ्यः, अनुसूचित-जनजातिभ्यः, अन्येभ्यः वञ्चितवर्गेभ्यः, युवाभ्यः, महिलाभ्यः च समर्पितः अयं सर्वकारः पुनः सत्तां प्राप्नोति।

## महाराष्ट्रस्य लातुर्-मण्डलस्य उद्गीर्-नगरे निर्वाचनसभां सम्बोधितवती प्रियङ्का वाड्रा




काङ्ग्रेसस्य महासचिवा प्रियङ्का गान्धी वाड्रा वृत्तिहीनता-महर्घतादिषु-विषयेषु प्रधानमन्त्री-नेतृत्वस्य एनडीए-सर्वकारस्य आलोचनां कृतवती । सा महाराष्ट्रस्य लातुर्-मण्डलस्य उद्गीर्-नगरे निर्वाचनसभां सम्बोधयन् अवदत् यत् केन्द्रसर्वकारे ३० लक्षपदानि रिक्तानि सन्ति, ७० कोटिः जनाः वृत्तिहीनाः सन्ति। वाड्रा महोदया उक्तवती यत् कृषिसाधनानाम् उपरि वस्तुसेवाकरः आरोपितः अस्ति, यदि तस्याः दलं सत्तां प्राप्नोति तर्हि सः निष्कासितः भविष्यति।

## निर्वाचनम् २०२४ विभिन्नराजनैतिदलानां मुख्याभियानकर्तारः उत्तरप्रदेशं साधयितुं संलग्नाः



हिमसंस्कृतवार्ताः लखनऊ

उत्तरप्रदेशस्य विभिन्नराजनैतिकदलानां मुख्याभियानकर्तारः वरिष्ठनेतारः च विभिन्नेषु निर्वाचनक्षेत्रेषु स्वस्वप्रत्याशिनः समर्थने निर्वाचनजनसभाः, मार्गप्रदर्शनं च कुर्वन्ति। मुख्यमंत्री भाजपादलस्य वरिष्ठनेता योगी-आदित्यनाथेन गतदिने हाथरस, फिरोजाबाद, औरैया इत्यत्र दलस्य प्रत्याशीनां पत्रे जनसभा आयोजिताः।

योगी आदित्यनाथः उक्तवान् यत् काङ्ग्रेस-भारत-गठबन्धनस्य आधारः भ्रष्टाचारः, नेपोटिज्मः च अस्ति। एकशतचत्वारिंशत् कोटिजनाः प्रधानमन्त्रिमोदीविषये विश्वासं कुर्वन्ति। सः अवदत् यत् समाजवादीपक्षस्य, काङ्ग्रेसस्य च नेतृणां सहानुभूतिः निर्धनानाम् प्रति नास्ति। समाजवादी दलस्य राष्ट्रीयाध्यक्षः कन्नौजलोकसभायाः प्रत्याशी अखिलेशयादवेन कानपुरदेहाते निर्वाचनसभा सम्बोधिता किञ्च मार्गप्रदर्शनं कृतम्। सः अवदत् यत् भाजपाशासनकाले जनाः महर्घतायाः कारणेन व्याकुलाः सन्ति। अखिलेशयादवः अवदत् यत् यदि गठबन्धनसर्वकारः सत्तां प्राप्नोति तर्हि निर्धनकृषकाणां ऋणं क्षमा भविष्यति।

केन्द्रीयमन्त्री तथा भाजपा नेता मीनाक्षी लेखी कानपुरे भाजपा महिला मोर्चा सम्मेलनं सम्बोधितवती।

## हिमाचले ऋतौ परिवर्तनम्- लाहौल-स्पीति, अटल- कन्दरासहितेषु उच्चशिखरेषु हिमपातः, कामरु- उपत्यकायां वज्रपातः

हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।

हिमाचलप्रदेशस्य अनेकेषु भागेषु ऋतौ परिवर्तनं जातम्। ऋतुविभागस्य सचेतनायाः मध्ये चम्बाजनपदस्य पाङ्गी, लाहौल-स्पीति, किन्नौरं, इत्यादिषु आदिवासीजनपदेषु उच्चपर्वतक्षेत्रेषु नवीनः हिमपातः अभवत्। शुक्रवासरे रात्रौ लाहौल-उपत्यकासहितस्य कुल्लू-जनपदस्य उच्चतरप्रदेशेषु हिमपातस्य कारणेन तापमानस्य न्यूनता ज्ञाता अस्ति। केलाङ्ग-कुकुमसेरी-क्षेत्रयोः न्यूनतमं तापमानं पुनः माइनस-पर्यन्तं प्राप्तम् अस्ति। अटल- कन्दरा-रोहताङ्गक्षेत्रात् वाहनानाम् आवागमनं निरन्तरं वर्तते किन्तु शिन्कुला-दर्रा-दारचा-क्षेत्रात् सरचु-पर्यन्तं राजमार्गः पुनः अवरुद्धः अस्ति। सीमामार्गसङ्गटनेन (बीआरओ) कतिपयदिनानि पूर्वं एषः मार्गः पुनः स्थापितः आसीत्। अप्रैलमासस्य अन्तिमसप्ताहे अपि लाहौल-स्पीति-मण्डले हिमपातस्य क्रमः न स्थगितः अस्ति।



१०:०० वादनपर्यन्तं राज्यस्य त्रिषु राष्ट्रियराजमार्गेषु, ६० मार्गेषु च यातायातस्य गतिः स्थगिता आसीत्। उच्चपर्वतक्षेत्रेषु हिमपातस्य, अन्येषु बहुषु भागेषु च वज्रपातस्य कारणेन ५३२ विद्युत् परिवर्तकाः बाधिता एव अभवन्।

### ५३२ विद्युत्परावर्तकाः बाधिताः

शुक्रवासरे रात्रौ कुल्लौ अपि वर्षा अभवत्। शनिवासरे अटलकन्दरारोहताङ्गस्य दक्षिणद्वारसहितं मनालीनगरस्य उच्चशिखरेषु हिमपातः अभवत्। नीचेषु क्षेत्रेषु प्रचण्डवृष्टिः अभवत्। अटलकन्दरायां हिमपातस्य कारणात् मनालीप्रशासनेन सोलङ्गनालायां पर्यटनवाहनानि स्थगितानि, कन्दरां प्रति गच्छन्तः पर्यटकाः अपराह्ने मनालीनगरं प्रति प्रेषिताः। प्रतिकूलवातावरणस्य कारणात् सेबवृक्षेषु फलस्थापनप्रक्रिया प्रभाविता भवितुम् अर्हति। उच्च-उच्चक्षेत्रेषु वर्षाकारणात् सेब-उपरि पुष्पितानि पुष्पाणि पतन्ति। शनिवासरे प्रातः

### चतुर्दिनानि यावत् प्रतिकूलं वातावरणं भविष्यति

शिमलायां वज्रपातेन सह वर्षा अपि अभवत्। लघु अश्मवृष्टिः अपि अभवत्। पश्चिमीविक्षोभस्य क्रियाकलापस्य कारणेन हिमाचलप्रदेशस्य अनेकेषु भागेषु आगामिषु चतुर्दिनेषु प्रतिकूलं वातावरणं भविष्यति इति ऋतुविज्ञानकेन्द्रशिमला इत्यनेन भविष्यवाणी कृता। २७, २९ एप्रिलपर्यन्तं प्रचण्डवृष्टिः, वज्रपातः, ओलापातः च इति नारङ्गवर्णीयसचेतना निर्गता अस्ति।

## अन्ताराष्ट्रीयम्

### जापानदेशस्य बोनिन्द्वीपे एकः प्रबलः भूकम्पः



गतदिने जापानदेशस्य बोनिन्द्वीपे एकः प्रबलः भूकम्पः आगतः। अस्य तीव्रता रिएक्टर्-मापने ६.९ इति मापिता । भूकम्पस्य केन्द्रं टोक्योतः दक्षिणदिशि प्रायः ८७५ किलोमीटर् दूरे पश्चिमतटस्य द्वीपसमूहे आसीत् । मध्यटोक्योनगरे अपि भूकम्पस्य लघुकम्पाः अनुभूताः । जापानस्य जलवायुविभागानुसारम् अयं भूकम्पः अपराह्ने प्रायः २:३६ वादने अभवत् । भूकम्पस्य कारणेन सुनामी सचेतना न अधिसूचिता । अद्यापि प्राणहानिः सम्पत्तिक्षयस्य वा वार्ता नास्ति।

ध्यातव्यमस्ति यत् गतप्रातः ताइवानदेशे न्यूनातिन्यूनं दश भूकम्पाः अनुभूताः। अत्यन्तं प्रबलः कम्पः रिक्टर्-मापने ६.१ इति मापितः । भूकम्पस्य केन्द्रं हुआलिन्-नगरात् चत्वारिंशत् किलोमीटर् दूरे प्रायः ११ किलोमीटर् गभीरे आसीत् । भूकम्पस्य कारणेन कापि क्षतिः इति वार्ता नास्ति । प्रायः सप्ताहद्वयं पूर्वं ताइवानदेशे ७.४ तीव्रतायां विनाशकारी भूकम्पः अभवत्, यस्मिन् १७ जनाः मृताः ।

## सुभाषितम्

**अज्ञोऽपि तज्ज्ञतामेति**
**शनैः शैलोऽपि चूर्ण्यते।**
**बाणोऽप्येति महालक्ष्यं**
**पश्याभ्यासविजृम्भितम्॥**

भावार्थः- अभ्यास करने की (साधना/उद्यम की) शक्ति इतनी है की अज्ञानी व्यक्ति भी धीरे धीरे और निरंतरता से ज्ञानी बन जाता है; यहा तक की पहाड भी चूर्ण हो जाते है और तीर भी सूक्ष्म निशाने पे अचूक लगता है।

*प्रतीकसाठ्ये मुम्बई*

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

# राजपुत्राणां समूहः भगिनीषु पुत्रीषु च अशोभनाः टिप्पण्यः करोति - कङ्गनारणौतः





**हिमसंस्कृतवार्ता- रामपुरम्।** मण्डीसंसदीय-निर्वाचनक्षेत्रस्य भाजपा प्रत्याशी कङ्गनारणौत इत्यनया काङ्ग्रेस प्रत्याशी विक्रमादित्यसिंहं लक्ष्यं कृत्वा हिमाचलस्य जनाः पथभ्रष्टाय राजकुमाराणां समूहाय पाठं पाठयिष्यन्ति इति उक्तवती। प्रासादनिवासी राजपुत्रः न जानाति जनदुःखं वेदनां च । देवभूमिकन्यानां अपमानं कुर्वद्भ्यः जनाः न क्षमयिष्यन्ति।

हिमाचलस्य सभ्यसंस्कृतौ अश्लीलटिप्पणीं कुर्वतां स्थानं नास्ति। शनिवासरे रामपुरबुशहरस्य झाकड़यां पन्नाप्रमुखसम्मेलने आनीविधानसभायाः निरमण्डे च तया उक्तं यत् यदा सा मण्डीसंसदीयक्षेत्रात् भाजपायाः नामपत्रं प्राप्नोत्। राजपुत्रसमूहः भगिनीसुकन्यासु च सर्वविधं अशोभनीयाः टिप्पण्यः कुर्वन् अस्ति। एतेन सम्पूर्णः देशः लज्जितः अभवत् ।

## मिथ्याप्रतिज्ञाभिः काङ्ग्रेसः सत्तां प्राप्नोत : भाजपा प्रत्याशी

विधानसभानिर्वाचने महिलाः प्रतिमासं १५००-१५०० रुप्यकाणि, प्रतिसेटकं १०० रुप्यकैः दुग्धं, प्रतिकिलो द्विरूप्यकेण गोमयं च क्रेतुं इति आश्वासनं दत्त्वा काङ्ग्रेसपक्षः सत्तां प्राप्तवान् । १५ मासेषु महिलानां कृते १५००-१५०० रूप्यकाणि न प्राप्तानि न च दुग्धस्य गोमयस्य च क्रयणं आरब्धम् । आपदासमये केन्द्रसर्वकारेण कोटिरूप्यकाणां आश्रयराशिः दत्ता आसीत्, परन्तु काङ्ग्रेससर्वकारः तदपि अङ्गीकृतवान् ।

## मण्डीजनानां आह्वानं दिल्लीं नेष्यामि- कङ्गना

राज्यसर्वकारेण केन्द्रात् प्राप्तस्य आश्रयराशेः प्रत्येकं नाणकं लेखा जनसामान्यस्य समक्षं स्थापनीयम्। कङ्गनारणौत इत्यनया उक्तं यत् यदा जनाः राजकुमारपरिवारेभ्यः स्वरं उत्थापयितुं वदन्ति तदा ते वदन्ति यत् अहं डाकपालः नास्मि इति। अधुना अहं मण्डीजनानाम् डाकपाल भूत्वा अत्र दिल्लीनगरे स्वरं उत्थापयिष्यामि।

सा मण्डीमण्डलस्य एकस्य लघुग्रामस्य निवासी अस्ति । अल्पे अन्तरिक्षे निवसितुं किं दुःखम्। अहं तं सम्यक् जानामि। केन्द्रसर्वकारस्य प्रयत्नेन अद्यत्वे पृष्ठक्षेत्रेषु प्रगतिः अभवत् । २०२७ तमे वर्षे यदा विधानसभानिर्वाचनं भविष्यति तदा हिमाचले २२ महिलाः विधानसभायां निर्वाचिताः भविष्यन्ति । कङ्गना पारम्परिकवेशभूषायां कार्यक्रमे आगता आसीत् ।

# 'धनशक्तिं जनशक्त्या पराजेतुं समयः आगतः'- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः

**हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् प्रायः सार्धैकवर्षस्य अल्पे कार्यकाले वर्तमानराज्यसर्वकारेण राज्यस्य हिताय समर्पणेन कार्यं कृतम्। सः अवदत् यत् राज्यसर्वकारः सर्वेषां सम्मानः, सर्वेषां अधिकारः इति मन्त्रेण अग्रे गच्छति। सः अवदत् यत् राज्यस्य विकासः भवतु, युवानः जीविकां प्राप्नुयुः, बालकानां भविष्यं उत्तमं भवतु, महिलाः स्वनिर्भराः भवेयुः, कृषकाः श्रमिकाः च आर्थिकरूपेण सशक्ताः भवेयुः इति राज्यसर्वकारः दिवारात्रौ कार्यं कुर्वन् अस्ति।




सुखविन्दरसिंहसुक्खुः उक्तवान् यत् वयं भूमिसीलविधानस्य संशोधनं कृत्वा पुत्रीभ्यः पुत्रैः समानं स्थानं दत्तवन्तः। सामान्यजनस्य राजस्वसम्बद्धसमस्यानां समाधानार्थं नियमपरिवर्तनं कृत्वा राजस्वलोकन्यायालयानां आयोजनं क्रियते। एतेषां न्यायालयानां माध्यमेन लक्षशः लम्बितराजस्वप्रकरणानाम् निराकरणं कृत्वा जनानां कृते महदाश्रयं प्रदत्तम् इति सः अवदत्। मुख्यमन्त्री उक्तवान् यत् केवलं सार्धैकवर्षेषु राज्यसर्वकारेण १० प्रमुखासु निर्वाचनप्रतिश्रुतिषु ५ प्रतिज्ञाः पूर्णाः कृताः। सः अवदत् यत् जनाः वर्तमानं राज्यसर्वकारं पञ्चवर्षेभ्यः निर्वाचितवन्तः, वयं सर्वाः प्रतिज्ञाः पूर्णां कर्तुं प्रतिबद्धाः स्मः। सः अवदत् यत् जनविश्वासः वर्तमानस्य राज्यसर्वकारस्य बलम् अस्ति।

मुख्यमंत्री सुक्खुः उक्तवान् यत् भाजपा धनशक्तिं प्रयुज्य मतशक्तेः अनादरं कुर्वन् अस्ति। सः अवदत् यत् काङ्ग्रेसपक्षस्य ६ विधायकाः धनशक्तेः प्रभावेण स्वं विक्रीय जनद्रोहं कृतवन्तः। तेषां स्वार्थेन राज्यस्य जनानां उपरि ६ उपनिर्वाचनानां अनावश्यकं भारं स्थापितं अस्ति। सः अवदत् यत् जनद्रोहः सोढुं न शक्यते, अधुना जनशक्त्या धनशक्तिं पराजयितुं समयः आगतः। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः २०२७ वर्षपर्यन्तं हिमाचलप्रदेशं स्वावलम्बीं कर्तुं सर्वप्रयत्नः कुर्वन् अस्ति तथा च अस्माकं संकल्पः अस्ति यत् २०३२ वर्षपर्यन्तं राज्यं देशस्य सर्वाधिकसमृद्धराज्यं करणीयम्।

# इतिहासं संस्कृतिं च प्रति जिज्ञासवः भवामः - विनोद बहलः



**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** इतिहासविभागः सरदारपटेलविश्वविद्यालयः मंडी इत्यनेन शोधसंवादकार्यक्रमस्य आयोजनं कृतम्। कार्यक्रमे मुख्यवक्तारूपेण विनोदबहलः उपस्थितः आसीत्। सः स्नातकोत्तरचतुर्थसत्रस्य छात्रान् मंडीप्रांतस्य इतिहास- संस्कृतिविषये च सविस्तरं बोधितवान्। शोधसंवादकार्यक्रमस्य प्रथमचक्रे सः मंड्याः ऐतिहासिकस्रोतविषये ज्ञानं दत्तवान्। तेनोक्तं यत् छात्राः स्वसभ्यतां, संस्कृतिम्, इतिहासं च तथ्यसहितं समाजस्य समक्षं स्थापयेयुः। संदर्भेऽस्मिन् प्रतिकुलपतिः आचार्या अनुपमासिंहः उक्तवती यत् छात्रैः प्राथमिकस्रोताधारेण ज्ञानम् एकत्रीकृत्य शोधकार्यं करणीयम्। कार्यक्रमस्य अध्यक्षता इतिहासविभागस्य प्रभारी डॉ. राकेश कुमार शर्मा अकरोत्। सः कार्यक्रमस्य उद्देश्यान् बोधितवान्, सर्वेषां च स्वागतं अकरोत्। अस्मिन्नवसरे इतिहासविभागस्य छात्राः गीता देवी, यशपालः, रवीना, खुशबू, अनीशः, गौरवकुमारसहितम् अनेकविद्यार्थिनः संवादमपि अकुर्वन्। कार्यक्रम-आयोजनसचिवः विकेशकुमारः मुख्यवक्तृभ्यः पुस्तकानि प्रदाय समानितम् अकरोत्। डॉ. रामपाल धन्यवादप्रस्तावं कृतवान्। कार्यक्रमे मंडी इंटैक सचिवः अनिल शर्मा अपि उपस्थितः आसीत्।

# एचएससीए इत्यनेन मानितः 12तमः स्थापनादिवसः

**हिमसंस्कृतवार्ताः- डॉ. राकेश शर्मा, मंडी।** हिम- साइंस- कांग्रेस एसोशिएशन (एचएससीए) इत्यनेन स्वकीयः 12तमः स्थापनादिवसः हिमाचलप्रदेशस्य मण्डी इत्यत्र मानितः। 2012तमस्य वर्षस्य 28 अप्रैल दिनांके अस्य संगठनस्य स्थापना देश- प्रदेशे विज्ञानस्य प्रचार-प्रसाराय जाता। संगठनस्य अध्यक्ष प्रो. दीपक पठानिया अस्य कार्यक्रमस्य अध्यक्षता कृता। सः उक्तवान् यत् एचएससीए पंजीकृता सोसाइटी इत्यस्ति, यस्याः गठनं प्रदेशस्य वैज्ञानिकेभ्यो अध्यापकेभ्यो व विद्यार्थिभ्यो च मंचप्रदाय विज्ञानस्य प्रोत्साहनं चास्ति। समये समये च संगठनम् अंतरराष्ट्रीय - राष्ट्रीय संगोष्ठीनामायोजनमपि




करोति। यत्र देश-विदेशस्य वैज्ञानिकाः निजशोधकार्यं प्रदर्शयन्ति। संगठनस्य अग्रिमसम्मेलनं राजकीयमहाविद्यालये बिलासपुरे अक्टूबरमासे आयोजितं भविष्यति। संगठनेन विद्यालय- महाविद्यालयस्तरे च विज्ञानं प्रोत्साहयितुम् आधारभूतसुविधाः सुदृढीकर्तुं प्रयासोऽपि क्रियते। ध्यातव्यमस्ति यत् राजकीय-प्राथमिक- पाठशाला रेडधार मंडी, राजकीय- वरिष्ठ- माध्यमिक- पाठशाला टोरखोला इत्यत्र च मूलभूतसुविधाः प्रदानेन सह एव छात्राः विज्ञानक्षेत्रे स्वभविष्यं चेतुं प्रोत्साहिताः। संगठनस्य कोषाध्यक्षः डॉ. जगदीप वर्मा अस्मिन् अवसरे संगठनस्य, एतस्य उद्देश्यान् च विस्तारपूर्वकं बोधितवान्। तत्पश्चात् संगठनस्य आजीवनसदस्याः डा. अक्षय कुमारः, डॉ. चेतन चौहानः, डॉ. मंजुला, डॉ. आशीषश्च विज्ञानक्षेत्रे स्वकीयाः अनुभवाः प्रकटिताः। अवसरेऽस्मिन् छात्राः स्वदैनिकजीवने प्लास्टिकस्य निर्भरता न्यूनीकर्तुं प्रणं कृतवन्तः।

# लोकसभानिर्वाचनम्: द्वितीयचरणस्य कृते ६०.९६ प्रतिशतं मतदानम्



**हिमसंस्कृतवार्ताः- प्रवीणकुमारः**
लोकसभानिर्वाचनस्य द्वितीयचरणे ६०.९६ प्रतिशतं मतदानं अभवत्। अस्मिन् चरणे ८८ लोकसभासनेषु मतदानं जातम्। मतदानं सामान्यतया शान्तिपूर्णं आसीत्, मतदातारः तापस्य आधिक्येऽपि उत्साहिताः आसन्। १३ राज्यानां, केन्द्रशासितप्रदेश-एकस्य च मतदातारः मतदानं कृतवन्तः।
अस्मिन् काले केरलतः २०, कर्णाटकात् १४, राजस्थानतः १३, उत्तरप्रदेशात् महाराष्ट्रात् च ८, मध्यप्रदेशात् ६, असमतः बिहारतः च पञ्च, पश्चिमबङ्गतः छत्तीसगढतः च ३, त्रिपुरा-मणिपुर-जम्मूकश्मीरेषु एकैकस्य आसनस्य कृते निर्वाचनम् अभवत्। बहुजनसमाजपक्षस्य प्रत्याशिनः निधनात् अधुना मध्यप्रदेशे बेतुलासनस्य मतदानं तृतीयचरणं भविष्यति। निर्वाचन- आयोगेन उक्तं यत् मतदातारः भयरहितवातावरणे मतदानं कृतवन्तः। एकलक्षाधिकेषु मतदानकेन्द्रेषु जालप्रसारितम् आयोगेन उक्तं यत् द्वितीयचरणस्य मध्ये छत्तीसगढस्य बस्तार- कङ्केर- संसदीयक्षेत्रस्य ४६ ग्रामेषु मतदातारः स्वस्वग्रामेषु स्थापितेषु मतदानकेन्द्रेषु प्रथमवारं लोकसभानिर्वाचने मतदानं कृतवन्तः। ग्रामजनानां सुविधायै एतेषु संसदीयक्षेत्रेषु प्रथमवारं १०२ नूतनानि मतदानकेन्द्राणि स्थापितानि। वंचितजनजातीयसमूहानां मतदातानां, वृद्धानाम्, युवानां, नूतनमतदातृनां, महिलामतदातृनां च सुविधायै विशेषव्यवस्था आसीत्।


# हरिद्वारे श्रीचेतनज्योति-आश्रमे प्रान्तसमीक्षायोजना-गोष्ठ्याः शुभारम्भः






**हिमसंस्कृतवार्ताः - जगदीश डाभी।** 27 अप्रैल दिनांके हरिद्वारे श्रीचेतनज्योति-आश्रमे प्रान्तसमीक्षायोजना-गोष्ठ्याः शुभारम्भः अभवम्। गोष्ठ्याः आरम्भः सरस्वतीमातुः पुरतः दीपप्रज्ज्वलनेन, हरिद्वार- जनपदाध्यक्षः डॉ. अरुणमिश्रमहोदयेन च वेदध्वनिना कृतः। मुख्यातिथिरूपेण अखिलभारतीय-सहसंघटनमन्त्री जयप्रकाशगौतममहोदयस्य सानिध्यं प्राप्तम्। विशिष्टातिथिरूपेण श्रीचेतनज्योति-आश्रमस्य परमाध्यक्षाः महन्त-ऋषेश्वरानन्द महाराजाः उपस्थिताः। महोदयेन उक्तम् यत् अस्माभिः अस्माकं संस्कृतेः संस्कृतस्य च रक्षणं कर्तव्यम्। कार्यक्रमस्य अध्यक्षत्वेन प्रान्ताध्यक्षा जानकी त्रिपाठी महोदया उपस्थिता आसीत्। प्रांतमन्त्री गिरीश तिवारी महोदयेन सर्वेषाम् अतिथिनां परिचयः कारितः।

# विधानसभासचिवालयेन निर्दलीय-विधायकेभ्यः सूचनापत्रं प्रेषितम्



**हिमसंस्कृतवार्ता- शिमला।** हिमाचलप्रदेशस्य त्रयाणां स्वतन्त्रविधायकानां त्यागपत्रसम्बद्धः विषयः पुनः विधानसभाध्यक्षपर्यन्तं प्राप्तः। वरिष्ठकाङ्ग्रेसनेता मन्त्रिमण्डलमन्त्री जगतसिंहनेगी इत्यस्य पक्षतः विधानसभासचिवालये याचिका प्रवेशिता अस्ति यत्र पलायनविरोधी विधानस्य अन्तर्गतं त्रयाणां निर्दलीयविधायकानां अयोग्यतायाः आग्रहः कृतः अस्ति। अस्यां याचिकायां विधानसभासचिवालयेन स्वतन्त्रविधायकानां कृते सूचना प्रसारिता अस्ति।
विधानसभाध्यक्षः कुलदीपसिंहः पठानिया इत्यनेन अस्य प्रकरणस्य श्रवणम् मई ४ दिनाङ्के निर्धारिता अस्ति। अस्यां तिथौ स्वतन्त्रविधायकान् सभापतिसमीपे उत्तरं दातव्यं भविष्यति। वस्तुतः नेगीमहोदयेन सभापतिपठानियायाः समक्षं याचिका प्रवेषिता अस्ति यत् निर्दलीयानां विरुद्धं पलायनविरोधी विधानस्य अन्तर्गतं कार्यविधिं कर्तुं आग्रहः कृतः अस्ति। सः कथयति यत् त्यागपत्रस्य स्वीकारात् पूर्वं निर्दलीयाः कस्मिन् अपि राजनैतिकदले सम्मिलितुं न शक्नुवन्ति। त्रयः अपि भारतीयजनतापक्षस्य अपारप्रभावस्य अधीनाः सन्ति, अस्य प्रभावस्य कारणात् ते त्यागपत्रं दत्तवन्तः। तेषां त्यागपत्रं अद्यापि विधानसभाध्यक्षस्य समीपे लम्बितम् अस्ति।
उल्लेखनीयं यत् एषः विषयः राज्यस्य उच्चन्यायालये अपि लम्बितः अस्ति। स्वतन्त्रविधायकानां त्यागपत्रसम्बद्धे राज्यन्यायालये प्रवेशितयाचिकायाः श्रवणं ३० एप्रिलपर्यन्तं स्थगितम् अस्ति। त्रयः स्वतन्त्राः विधायकाः त्यागपत्रस्य अस्वीकारस्य, सभापतिना तेभ्यः कारणसूचनाप्रदानस्य च विरुद्धं न्यायालये याचिकाम् कृतवन्तः। गतगुरुवासरे मुख्यन्यायाधीशः एम.एस.रामचन्द्रावस्य, न्यायाधीशस्य ज्योत्स्नारिवालदुआयाश्च संभागपीठस्य समक्षं प्रकरणस्य श्रवणम् अभवत्। उच्चन्यायालयेन अस्य प्रकरणस्य अग्रिमविचारः ३० एप्रिल दिनाङ्के निर्धारितः अस्ति। देहरातः निर्दलीयविधायकः होशियारसिंहः, नालागढतः निर्दलीयविधायकः केएलठाकुरः, हमीरपुरतः निर्दलीयविधायकः आशीषशर्मा च २२ मार्चदिनाङ्के विधानसभाध्यक्ष-सचिवयोः समक्षं विधानसभासदस्यतायाः त्यागपत्रं प्रदत्तवन्तः आसन्। त्यागपत्राणां एका प्रतिलिपिः राज्यपालाय शिवप्रतापशुक्लाय अपि दत्ता। राज्यपालः त्यागपत्राणां प्रतिलिपयः विधानसभासभापतिं प्रति अपि प्रेषितवान् आसीत् । तेषां आरोपः अस्ति यत् विधानसभासभापतिः पठानिया ज्ञात्वैव त्यागपत्राणि न अनुमोदितवान्।

# धारावाहिकं गीताप्रश्नोत्तरम् -४१

**अर्जुनः**- प्रेमिभक्तसदृशाः अन्ये भक्ताः न सन्ति इत्यत्र किं कारणं भगवन्?
**श्रीकृष्णः**- अन्यविधाः भक्ताः प्रायशः विविधकामनाभिः युक्ताः भवन्ति। तेषु वासुदेवः सर्वम् इति भावना न दृश्यते। एतादृशाः स्वभावपरवशाः मनुष्याः मम शरणागतिम् अस्वीकृत्य स्वकामनापूर्त्ये अनेकान् उपायान्, नियमान् च धारयन्ति, अन्यदेवान् प्रपद्यन्ते, अनुपासते च।
**अर्जुनः**- तर्हि भवान् तान् स्वदिशि कथं वा न कर्षयति प्रभो?
**श्रीकृष्णः**- तथा न शक्यते अर्जुन। मया तेभ्यः स्वातन्त्र्यं दत्तमस्ति, अतः तस्य अपहरणम् अनुचितम्। प्रत्युत यः मनुष्यः यं देवं पूजयितुम् इच्छति, तं प्रति अहं तस्य श्रद्धां दृढीकरोमि। सः तया श्रद्धया युक्तः सकामभावेन तं देवं पूजयति। परन्तु विशेषवार्ता यत् तया उपासनया सः यत्फलं प्राप्नोति, तत् तु मया एव विहितं फलं स्यादिति। किन्तु सकामभावेन देवोपासनां कर्तारः ते अल्पबुद्धयः भवन्ति, एवम् अन्तवत्, उत्पत्तिविनाशशीलं फलं च प्राप्नुवन्ति, न वा ते मां प्राप्नुयुः। एतादृशाः अन्यदेवपूजकाः भक्ताः अधिकाद् अधिकं देवानां पुनरावर्तिनः लोकान् प्राप्तुम् अर्हेयुः, परं मे भक्ताः तु मामेव प्राप्नुवन्ति।
**अर्जुनः**- यदि ते त्वामेव प्राप्नुयुः, तर्हि सर्वे मनुष्याः तव भक्ताः किमर्थं न भवन्ति भगवन्?



**श्रीकृष्णः**- पार्थ! बुद्धिरहिताः मनुष्याः मम अनाशिनं परं भावम् अजानन्तः, अव्यक्तं परमात्मानं मां जन्ममरणधर्मिणं सामान्यं मनुष्यं मन्यन्ते। अतः ते कथं वा मम भक्ताः भवेयुः? इति। (गीता -७/२०-२४)

हिमसंस्कृतवार्ताः (अनुवर्तिष्यते)
-नारदोपाध्यायः।

# "लग्नभावफलविचारः" इति विषये विशिष्टव्याख्यानस्य आयोजनं जातम्

**हिमसंस्कृतवार्ताः- डॉ. दिनेशः चौबे, उज्जयिनी ।** उज्जयिनीस्थस्य महर्षिपाणिनि- संस्कृत-वैदिक- विश्वविद्यालयस्य ज्योतिषविभागस्य तत्त्वावधाने अप्रैलमासस्य 27 तमेदिनाङ्के सायं ४ वादने 'लग्नभावफलविचारः' इति विषये आभासीपटलमाध्यमेन विशिष्टव्याख्यानस्य आयोजनं कृतम्। मुख्यवक्तृरूपेण श्रीसोमनाथसंस्कृत विश्वविद्यालयस्य, वेरावलस्य, गुजरातस्य ज्योतिषविभागस्य सहायिकाचार्या डॉ. अपूर्वा अग्रवालमहोदया लग्नस्य परिभाषाखगोलीयस्थिती, कुण्डलीविधानस्य सम्यक् गणितीय एवञ्च फलितीय पक्षाणाम् उपस्थापनेन साकम् आचार्यपराशरः, मन्त्रेशादिप्राचीन आचार्याणाम् उद्धरणं, त्रिकदोषस्य निवारणं, शारीरिकसुखस्वभावः, वृत्तिप्राप्तिः इत्यादि विषये प्रमुखतया उद्बोधितवती। कार्यक्रमसंरक्षकः माननीयः कुलगुरुः आचार्यः विजयकुमार सीजी महोदयः ज्योतिषशास्त्रस्य वैज्ञानिकपक्षनामुपरी सभां संबोधितवान्। सत्राध्यक्षता ज्योतिषविभागाध्यक्षेन डॉ. उपेन्द्रभार्गवमहोदयेन विहिता। स्वागतभाषणं डॉ. योगेशकुमारेण, संचालनं डॉ. पवनकुमारमिश्रमहोदयेन, धन्यवादज्ञापनञ्च डॉ. रूपेशकुमारमिश्रेण कृतम्। व्याख्यानकार्यक्रमे देशविदेशस्य च बुद्धिजीविनः, छात्राः, शिक्षकाः च आभासीय प्लेटफॉर्म Zoom App इत्यस्य माध्यमेन कार्यक्रमे सम्मिलिताः अभवन्। कल्याणमन्त्रेण कार्यक्रमस्य समाप्तिः अभवत्।